# Shri Uchchishtaganapati Sahasranama Stotram

# શ્રીઉચ્છિષ્ટગણપતિસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrIuchChiShTagaNapatisahasranAmastotram

File name : uchChiShTagaNapatisahasranAmastotram.itx

Category : sahasranAma, ganesha

Location : doc_ganesha

Transliterated by : DPD, help from Alex

Proofread by : DPD, PSA Easwaran, Shankara

Description-comments : RudrayAmalatantra

Latest update : November 7, 2014, December 9, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 11, 2025

*sanskritdocuments.org*

# શ્રીઉચ્છિષ્ટગણપતિસહસ્રનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

શ્રીભૈરવ ઉવાચ ।
શૃ‍ણુ દેવિ રહસ્યં મે યત્પુરા સૂચિતં મયા ।
તવ ભક્ત્યા ગણેશસ્ય વક્ષ્યે નામસહસ્રકમ્ ॥ ૧॥

શ્રીદેવ્યુવાચ ।
ૐ ભગવન્ગણનાથસ્ય ઉચ્છિષ્ટસ્ય મહાત્મનઃ ।
શ્રોતું નામ સહસ્રં મે હૃદયં પ્રોત્સુકાયતે ॥ ૨॥

શ્રીભૈરવ ઉવાચ ।
પ્રાઙ્મુખે ત્રિપુરાનાથે જાતા વિઘ્નકુલાઃ શિવે ।
મોહને મુચ્યતે ચેતસ્તૈઃ સર્વૈર્બલદર્પિતૈઃ ॥ ૩॥

તદા પ્રભું ગણાધ્યક્ષં સ્તુત્વા નામસહસ્રકૈઃ ।
વિઘ્ના દૂરાત્પલાયન્તે કાલરુદ્રાદિવ પ્રજાઃ ॥ ૪॥

તસ્યાનુગ્રહતો દેવિ જાતોઽહં ત્રિપુરાન્તકઃ ।
તમદ્યાપિ ગણેશાનં સ્તૌમિ નામસહસ્રકૈઃ ॥ ૫॥

તદદ્ય તવ ભક્ત્યાહં સાધકાનાં હિતાય ચ ।
મહાગણપતેર્વક્ષ્યે દિવ્યં નામસહસ્રકમ્ ॥ ૬॥

ૐ અસ્ય શ્રીઉચ્છિષ્ટગણેશસહસ્રનામસ્તોત્રમન્ત્રસ્ય શ્રીભૈરવ ઋષિઃ ।
ગાયત્રી છન્દઃ । શ્રીમહાગણપતિર્દેવતા ।
ગં બીજમ્ । હ્રીં શક્તિઃ । કુરુકુરુ કીલકમ્ ।
મમ ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ॥

ૐ હ્રીં શ્રીં ક્લીં ગણાધ્યક્ષો ગ્લૌં ગઁ ગણપતિર્ગુણી ।
ગુણાઢ્યો નિર્ગુણો ગોપ્તા ગજવક્ત્રો વિભાવસુઃ ॥ ૭॥

વિશ્વેશ્વરો વિભાદીપ્તો દીપનો ધીવરો ધની ।
સદા શાન્તો જગત્ત્રાતા વિશ્વાવર્તો વિભાકરઃ ॥ ૮॥

વિશ્રમ્ભી વિજયો વૈદ્યો વારાન્નિધિરનુત્તમઃ ।
અણિમાવિભવઃ શ્રેષ્ઠો જ્યેષ્ઠો ગાથાપ્રિયો ગુરુઃ ॥ ૯॥

સૃષ્ટિકર્તા જગદ્ધર્તા વિશ્વભર્તા જગન્નિધિઃ ।
પતિઃ પીતવિભૂષાઙ્ગો રક્તાક્ષો લોહિતામ્બરઃ ॥ ૧૦॥

વિરૂપાક્ષો વિમાનસ્થો વિનીતઃ સદસ્યઃ સુખી । સાત્વતઃ
સુરૂપઃ સાત્ત્વિકઃ સત્યઃ શુદ્ધઃ શઙ્કરનન્દનઃ ॥ ૧૧॥

નન્દીશ્વરો જયાનન્દી વન્દ્યઃ સ્તુત્યો વિચક્ષણઃ ।
દૈત્યમર્દી સદાક્ષીબો મદિરારુણલોચનઃ ॥ ૧૨॥

સારાત્મા વિશ્વસારશ્ચ વિશ્વસારો(ર) વિલેપનઃ ।
પરં બ્રહ્મ પરં જ્યોતિઃ સાક્ષી ત્ર્યક્ષો વિકત્થનઃ ॥ ૧૩॥

વિશ્વેશ્વરો વીરહર્તા સૌભાગ્યો ભાગ્યવર્દ્ધનઃ ।
ભૃઙ્ગિરિટી ભૃઙ્ગમાલી ભૃઙ્ગકૂજિતનાદિતઃ ॥ ૧૪॥

વિનર્તકો વિનીતોઽપિ વિનતાનન્દનાર્ચિતઃ ।
વૈનતેયો વિનમ્રાઙ્ગો વિશ્વનાયકનાયકઃ ॥ ૧૫॥

વિરાટકો વિરાટશ્ચ વિદગ્ધો વિધુરાત્મભૂઃ ।
પુષ્પદન્તઃ પુષ્પહારી પુષ્પમાલાવિભૂષણઃ ॥ ૧૬॥

પુષ્પેષુમથનઃ પુષ્ટો વિવર્તઃ કર્તરીકરઃ ।
અન્ત્યોઽન્તકશ્ચિત્તગણાશ્ચિત્તચિન્તાપહારકઃ ॥ ૧૭॥

અચિન્ત્યોઽચિન્ત્યરૂપશ્ચ ચન્દનાકુલમુણ્ડકઃ ।
લોહિતો લિપિતો લુપ્તો લોહિતાક્ષો વિલોભકઃ ॥ ૧૮॥

લબ્ધાશયો લોભરતો લોભદોઽલઙ્ઘ્યગર્ધકઃ ।
સુન્દરઃ સુન્દરીપુત્રઃ સમસ્તાસુરઘાતકઃ ॥ ૧૯॥

નૂપુરાઢ્યો વિભવેન્દ્રો નરનારાયણો રવિઃ ।
વિચારો વાન્તદો વાગ્મી વિતર્કી વિજયીશ્વરઃ ॥ ૨૦॥

સુજ્ઞો બુદ્ધઃ સદારૂપઃ સુખદઃ સુખસેવિતઃ ।
વિકર્તનો વિપચ્ચારી વિનટો નટનર્તકઃ ॥ ૨૧॥

નટો નાટ્યપ્રિયો નાદોઽનન્તોઽનન્તગુણાત્મકઃ ।
ગઙ્ગાજલપાનપ્રિયો ગઙ્ગાતીરવિહારકૃત્ ॥ ૨૨॥

ગઙ્ગાપ્રિયો ગઙ્ગજશ્ચ વાહનાદિપુરઃસરઃ ।
ગન્ધમાદનસંવાસો ગન્ધમાદનકેલિકૃત્ ॥ ૨૩॥

ગન્ધાનુલિપ્તપૂર્વાઙ્ગઃ સર્વદેવસ્મરઃ સદા ।
ગણગન્ધર્વરાજેશો ગણગન્ધર્વસેવિતઃ ॥ ૨૪॥

ગન્ધર્વપૂજિતો નિત્યં સર્વરોગવિનાશકઃ ।
ગન્ધર્વગણસંસેવ્યો ગન્ધર્વવરદાયકઃ ॥ ૨૫॥

ગન્ધર્વો ગન્ધમાતઙ્ગો ગન્ધર્વકુલદૈવતઃ ।
ગન્ધર્વગર્વસંવેગો ગન્ધર્વવરદાયકઃ ॥ ૨૬॥

ગન્ધર્વપ્રબલાર્તિઘ્નો ગન્ધર્વગણસંયુતઃ ।
ગન્ધર્વાદિગુણાનન્દો નન્દોઽનન્તગુણાત્મકઃ ॥ ૨૭॥

વિશ્વમૂર્તિર્વિશ્વધાતા વિનતાસ્યો વિનર્તકઃ ।
કરાલઃ કામદઃ કાન્તઃ કમનીયઃ કલાનિધિઃ ॥ ૨૮॥

કારુણ્યરૂપઃ કુટિલઃ કુલાચારી કુલેશ્વરઃ ।
વિકરાલો રણશ્રેષ્ઠઃ સંહારો હારભૂષણઃ ॥ ૨૯॥

ઉરુરભ્યમુખો રક્તો દેવતાદયિતૌરસઃ ।
મહાકાલો મહાદંષ્ટ્રો મહોરગભયાનકઃ ॥ ૩૦॥

ઉન્મત્તરૂપઃ કાલાગ્નિરગ્નિસૂર્યેન્દુલોચનઃ ।
સિતાસ્યઃ સિતમાલ્યશ્ચ સિતદન્તઃ સિતાંશુમાન્ ॥ ૩૧॥

અસિતાત્મા ભૈરવેશો ભાગ્યવાન્ભગવાન્ભવઃ ।
ગર્ભાત્મજો ભગાવાસો ભગદો ભગવર્દ્ધનઃ ॥ ૩૨॥

શુભઙ્કરઃ શુચિઃ શાન્તઃ શ્રેષ્ઠઃ શ્રવ્યઃ શચીપતિઃ ।
વેદાદ્યો વેદકર્તા ચ વેદવેદ્યઃ સનાતનઃ ॥ ૩૩॥

વિદ્યાપ્રદો વેદરસો વૈદિકો વેદપારગઃ ।
વેદધ્વનિરતો વીરો વેદવિદ્યાગમોઽર્થવિત્ ॥ ૩૪॥

તત્ત્વજ્ઞઃ સર્વગઃ સાધુઃ સદયઃ સદસન્મયઃ ।

શિવશઙ્કરઃ શિવસુતઃ શિવાનન્દવિવર્દ્ધનઃ ॥ ૩૫॥

શૈત્યઃ શ્વેતઃ શતમુખો મુગ્ધો મોદકભૂષણઃ ।
દેવો દિનકરો ધીરો ધૃતિમાન્દ્યુતિમાન્ધવઃ ॥ ૩૬॥

શુદ્ધાત્મા શુદ્ધમતિમાઞ્છુદ્ધદીપ્તિઃ શુચિવ્રતઃ ।
શરણ્યઃ શૌનકઃ શૂરઃ શરદમ્ભોજધારકઃ ॥ ૩૭॥ ન્
દારકઃ શિખિવાહેષ્ટઃ સિતઃ શઙ્કરવલ્લભઃ ।
શઙ્કરો નિર્ભયો નિત્યો લયકૃલ્લાસ્યતત્પરઃ ॥ ૩૮॥

લૂતો લીલારસોલ્લાસી વિલાસી વિભ્રમો ભ્રમઃ ।
ભ્રમણઃ શશિભૃત્સૂર્યઃ શનિર્ધરણિનન્દનઃ ॥ ૩૯॥

બુધો વિબુધસેવ્યશ્ચ બુધરાજો બલંધરઃ ।
જીવો જીવપ્રદો જેતા સ્તુત્યો નિત્યો રતિપ્રિયઃ ॥ ૪૦॥

જનકો જનમાર્ગજ્ઞો જનરક્ષણતત્પરઃ ।
જનાનન્દપ્રદાતા ચ જનકાહ્લાદકારકઃ ॥ ૪૧॥

વિબુધો બુધમાન્યશ્ચ જૈનમાર્ગનિવર્તકઃ ।
ગચ્છો ગણપતિર્ગચ્છનાયકો ગચ્છગર્વહા ॥ ૪૨॥

ગચ્છરાજોથ ગચ્છેથો ગચ્છરાજનમસ્કૃતઃ ।
ગચ્છપ્રિયો ગચ્છગુરુર્ગચ્છત્રાકૃધમાતુરઃ ॥ ૪૩॥

ગચ્છપ્રભુર્ગચ્છચરો ગચ્છપ્રિયકૃતાધમઃ ।
ગચ્છગીતગુણોગર્તો મર્યાદાપ્રતિપાલકઃ ॥ ૪૪॥

ગીર્વાણાગમસારસ્ય ગર્ભો ગીર્વાણદેવતા ।
ગૌરીસુતો ગુરુવરો ગૌરાઙ્ગો ગણપૂજિતઃ ॥ ૪૫॥

પરમ્પદં પરન્ધામ પરમાત્મા કવિઃ કુજઃ ।
રાહુર્દૈત્યશિરશ્છેદી કેતુઃ કનકકુણ્ડલઃ ॥ ૪૬॥

ગ્રહેન્દ્રો ગ્રહિતો ગ્રાહ્યોઽગ્રણીર્ઘુર્ઘુરનાદિતઃ ।
પર્જન્યઃ પીવરઃ પત્રી પીનવક્ષાઃ પરાક્રમી ॥ ૪૭॥

વનેચરો વનસ્પતિર્વનવાસી સ્મરોપમઃ ।
પુણ્યઃ પૂતઃ પવિત્રશ્ચ પરાત્મા પૂર્ણાવિગ્રહઃ ॥ ૪૮॥

પૂર્ણેન્દુસુકલાકારો મન્ત્રપૂર્ણમનોરથઃ ।

યુગાત્મા યુગકૃદ્યજ્વા યાજ્ઞિકો યજ્ઞવત્સલઃ ॥ ૪૯॥

યશસ્યો યજમાનેષ્ટો વજ્રભૃદ્વજ્રપઞ્જરઃ ।
મણિભદ્રો મણિમયો માન્યો મીનધ્વજાશ્રિતઃ ॥ ૫૦॥

મીનધ્વજો મનોહારી યોગિનાં યોગવર્ધનઃ ।
દ્રષ્ટા સ્રષ્ટા તપસ્વી ચ વિગ્રહી તાપસપ્રિયઃ ॥ ૫૧॥

તપોમયસ્તપોમૂર્તિસ્તપનશ્ચ તપોધનઃ ।
સમ્પત્તિસદનાકારઃ સમ્પત્તિસુખદાયકઃ ॥ ૫૨॥

સમ્પત્તિસુખકર્તા ચ સમ્પત્તિસુભગાનનઃ ।
સમ્પત્તિશુભદો નિત્યસમ્પત્તિશ્ચ યશોધનઃ ॥ ૫૩॥

રુચકો મેચકસ્તુષ્ટઃ પ્રભુસ્તોમરઘાતકઃ ।
દણ્ડી ચણ્ડાંશુરવ્યક્તઃ કમણ્ડલુધરોઽનઘઃ ॥ ૫૪॥

કામી કર્મરતઃ કાલઃ કોલઃ ક્રન્દિતદિક્તટઃ ।
ભ્રામકો જાતિપૂજ્યશ્ચ જાડ્યહા જડસૂદનઃ ॥ ૫૫॥

જાલન્ધરો જગદ્વાસી હાસ્યકૃદ્ગહનો ગુહઃ ।
હવિષ્માન્હવ્યવાહાક્ષો હાટકો હાટકાઙ્ગદઃ ॥ ૫૬॥

સુમેરુર્હિમવાન્હોતા હરપુત્રો હલઙ્કુષઃ ।
હાલાપ્રિયો હૃદા શાન્તઃ કાન્તાહૃદયપોષણઃ ॥ ૫૭॥

શોષણઃ ક્લેશહા ક્રૂરઃ કઠોરઃ કઠિનાકૃતિઃ ।
કુબેરો ધીમયો ધ્યાતા ધ્યેયો ધીમાન્દયાનિધિઃ ॥ ૫૮॥

દવિષ્ઠો દમનો હૃષ્ટો દાતા ત્રાતા પિતાસમઃ ।
નિર્ગતો નૈગમોઽગમ્યો નિર્જયો જટિલોઽજરઃ ॥ ૫૯॥

જનજીવો જિતારાતિર્જગદ્વ્યાપી જગન્મયઃ ।
ચામીકરનિભો નાભ્યો નલિનાયતલોચનઃ ॥ ૬૦॥

રોચનો મોચકો મન્ત્રી મન્ત્રકોટિસમાશ્રિતઃ ।
પઞ્ચભૂતાત્મકઃ પઞ્ચસાયકઃ પઞ્ચવક્ત્રકઃ ॥ ૬૧॥

પઞ્ચમઃ પશ્ચિમઃ પૂર્વઃ પૂર્ણઃ કીર્ણાલકઃ કુણિઃ ।
કઠોરહૃદયો ગ્રીવાલઙ્કૃતો લલિતાશયઃ ॥ ૬૨॥

લોલચિત્તો બૃહન્નાસો માસપક્ષર્તુરૂપવાન્ ।
ધ્રુવો દ્રુતગતિર્બન્ધો ધર્મી નાકિપ્રિયોઽનલઃ ॥ ૬૩॥

અઙ્ગુલ્યગ્રસ્થભુવનો ભુવનૈકમલાપહઃ ।
સાગરઃ સ્વર્ગતિઃ સ્વક્ષઃ સાનન્દઃ સાધુપૂજિતઃ ॥ ૬૪॥

સતીપતિઃ સમરસઃ સનકઃ સરલઃ સરઃ ।
સુરપ્રિયો વસુમતિર્વાસવો વસુપૂજિતઃ ॥ ૬૫॥

વિત્તદો વિત્તનાથશ્ચ ધનિનાં ધનદાયકઃ ।
રાજીવનયનઃ સ્માર્તઃ સ્મૃતિદઃ કૃત્તિકામ્બરઃ ॥ ૬૬॥

અશ્વિનોઽશ્વમુખઃ શુભ્રો ભરણો ભરણીપ્રિયઃ ।
કૃત્તિકાસનકઃ કોલો રોહિણીરમણોપમઃ ॥ ૬૭॥

રૌહિણેયપ્રેમકરો રોહિણીમોહનો મૃગઃ ।
મૃગરાજો મૃગશિરા માધવો મધુરધ્વનિઃ ॥ ૬૮॥

આર્દ્રાનનો મહાબુદ્ધિર્મહોરગવિભૂષણઃ ।
ભ્રૂક્ષેપદત્તવિભવો ભ્રૂકરાલઃ પુનર્મયઃ ॥ ૬૯॥

પુનર્દેવઃ પુનર્જેતા પુનર્જીવઃ પુનર્વસુઃ ।
તિમિરાસ્તિમિકેતુશ્ચ તિમિષાસુરઘાતનઃ ॥ ૭૦॥

તિષ્યસ્તુલાધરો જૃમ્ભો વિશ્લેષાશ્લેષદાનરાટ્ ।
માનદો માધવો માધો વાચાલો મઘવોપમઃ ॥ ૭૧॥

મઘ્યો મઘાપ્રિયો મેઘો મહાશુણ્ડો મહાભુજઃ ।
પૂર્વફાલ્ગુનિકઃ સ્ફીત ફલ્ગુરુત્તરફાલ્ગુનઃ ॥ ૭૨॥

ફેનિલો બ્રહ્મદો બ્રહ્મા સપ્તતન્તુસમાશ્રયઃ ।
ઘોણાહસ્તશ્ચતુર્હસ્તો હસ્તિવન્ધ્યો હલાયુધઃ ॥ ૭૩॥

ચિત્રામ્બરાર્ચિતપદઃ સ્વસ્તિદઃ સ્વસ્તિનિગ્રહઃ ।
વિશાખઃ શિખિસેવ્યશ્ચ શિખિધ્વજસહોદરઃ ॥ ૭૪॥

અણુરેણૂત્કરઃ સ્ફારો રુરુરેણુસુતો નરઃ ।
અનુરાધાપ્રિયો રાધઃ શ્રીમાઞ્છુક્લઃ શુચિસ્મિતઃ ॥ ૭૫॥

જ્યેષ્ઠઃ શ્રેષ્ઠાર્ચિતપદો મૂલં ચ ત્રિજગદ્ગુરુઃ ।
શુચિશ્ચૈવ પૂર્વાષાઢશ્ચોત્તરાષાઢ ઈશ્વરઃ ॥ ૭૬॥

શ્રવ્યોઽભિજિદનન્તાત્મા શ્રવો વેપિતદાનવઃ ।
શ્રાવણઃ શ્રવણઃ શ્રોતા ધની ધન્યો ધનિષ્ઠકઃ ॥ ૭૭ ॥

શાતાતપઃ શાતકુમ્ભઃ શરજ્જ્યોતિઃ શતાભિષક્ ।
પૂર્વાભાદ્રપદો ભદ્રશ્ચોત્તરાભાદ્રપાદિતઃ ॥ ૭૮ ॥

રેણુકાતનયો રામો રેવતીરમણો રમી ।
આશ્વયુક્કાર્તિકેયેષ્ટો માર્ગશીર્ષો મૃગોત્તમઃ ॥ ૭૯ ॥

પોષેશ્વરઃ ફાલ્ગુનાત્મા વસન્તશ્ચૈત્રકો મધુઃ ।
રાજ્યદોઽભિજિદાત્મેયસ્તારેશસ્તારકદ્યુતિઃ ॥ ૮૦ ॥

પ્રતીતઃ પ્રોર્જિતઃ પ્રીતઃ પરમઃ પરમો હિતઃ ।
પરહા પઞ્ચભૂઃ પઞ્ચવાયુપૂજ્યપરિગ્રહઃ ॥ ૮૧ ॥

પુરાણાગમવિદ્યોગી મહિષો રાસભોઽગ્રજઃ ।
ગ્રહો મેષો મૃષો મન્દો મન્મથો મિથુનાકૃતિઃ ॥ ૮૨ ॥

કલ્પભૃત્કટકો દીપો મર્કટઃ કર્કટો ધૃણિઃ ।
કુક્કુટો વનજો હંસઃ પરમહંસઃ સૃગાલકઃ ॥ ૮૩ ॥

સિંહા સિંહાસનાભૂષ્યો મદ્ગુર્મૂષકવાહનઃ ।
પુત્રદો નરકત્રાતા કન્યાપ્રીતઃ કુલોદ્વહઃ ॥ ૮૪ ॥

અતુલ્યરૂપો બલદસ્તુલ્યભૃત્તુલ્યસાક્ષિકઃ ।
અલિશ્ચાપધરો ધન્વી કચ્છપો મકરો મણિઃ ॥ ૮૫ ॥

કુમ્ભભૃત્કલશઃ કુબ્જો મીનમાંસસુતર્પિતઃ ।
રાશિતારાગ્રહમયસ્તિથિરૂપો જગદ્વિભુઃ ॥ ૮૬ ॥

પ્રતાપી પ્રતિપત્પ્રેયોઽદ્વિતીયોઽદ્વૈતનિશ્ચિતઃ ।
ત્રિરૂપશ્ચ તૃતીયાગ્નિસ્ત્રયીરૂપસ્ત્રયીતનુઃ ॥ ૮૭ ॥

ચતુર્થીવલ્લભો દેવો પરાગઃ પઞ્ચમીશ્વરઃ ।
ષડ્રસાસ્વાદવિજ્ઞાનઃ ષષ્ઠીષષ્ટિકવત્સલઃ ॥ ૮૮ ॥

સપ્તાર્ણવગતિઃ સારઃ સપ્તમીશ્વરરોહિતઃ ।
અષ્ટમીનન્દનોત્તંસો નવમીભક્તિભાવિતઃ ॥ ૮૯ ॥

દશદિક્પતિપૂજ્યશ્ચ દશમી દ્રુહિણો દ્રુતઃ ।

એકાદશાત્મગણયો દ્વાદશીયુગચર્ચિતઃ ॥ ૯૦॥

ત્રયોદશમણિસ્તુત્યશ્ચતુર્દશસ્વરપ્રિયઃ ।
ચતુર્દશેન્દ્રસંસ્તુત્યઃ પૂર્ણિમાનન્દવિગ્રહઃ ॥ ૯૧॥

દર્શદર્શો દર્શનશ્ચ વાનપ્રસ્થો મહેશ્વરઃ ।
મૌર્વી મધુરવાઙ્મૂલમૂર્તિમાન્મેઘવાહનઃ ॥ ૯૨॥

મહાગજો જિતક્રોધો જિતશત્રુર્જયાશ્રયઃ ।
રૌદ્રો રુદ્રપ્રિયો રુદ્રો રુદ્રપુત્રોઽઘનાશનઃ ॥ ૯૩॥

ભવપ્રિયો ભવાનીષ્ટો ભારભૃદ્ભૂતભાવનઃ ।
ગાન્ધર્વકુશલોઽકુણ્ઠો વૈકુણ્ઠો વિષ્ટરશ્રવાઃ ॥ ૯૪॥

વૃત્રહા વિઘ્નહા સીરઃ સમસ્તદુઃખતાપહા ।
મઞ્જુલો માર્જરો મત્તો દુર્ગાપુત્રો દુરાલસઃ ॥ ૯૫॥

અનન્તચિત્સુધાધોરો વીરો વીર્યૈકસાધકઃ ।
ભાસ્વન્મુકુટમાણિક્યઃ કૂજત્કિઙ્કિણિજાલકઃ ॥ ૯૬॥

શુણ્ડાધારી તુણ્ડચલઃ કુણ્ડલી મુણ્ડમાલકઃ ।
પદ્માક્ષઃ પદ્મહસ્તશ્ચ પદ્મનાભસમર્ચિતઃ ॥ ૯૭॥

ઉદ્ધૃતાધરદન્તાઢ્યો માલાભૂષણભૂષિતઃ ।
મારદો વારણો લોલશ્રવણઃ શૂર્પકર્ણકઃ ॥ ૯૮॥

બૃહદુલ્લાસનાસાઢ્યો વ્યાપ્તત્રૈલોક્યમણ્ડલઃ ।
રત્નમણ્ડલમધ્યસ્થઃ કૃશાનુરૂપશીલકઃ ॥ ૯૯॥

બૃહત્કર્ણાઞ્ચલોદ્ભૂતવાયુવીજિતદિક્તટઃ ।
બૃહદાસ્યરવાક્રાન્તભીતબ્રહ્માણ્ડભાણ્ડકઃ ॥ ૧૦૦॥

બૃહત્પાદસમાક્રાન્તસપ્તપાતાલદીપિતઃ ।
બૃહદ્દન્તકૃતાત્યુગ્રરણાનન્દરસાલસઃ ॥ ૧૦૧॥

બૃહદ્ધસ્તધૃતાશેષાયુધનિર્જિતદાનવઃ ।
સ્ફૂરત્સિન્દૂરવદનઃ સ્ફૂરત્તેજોઽગ્નિલોચનઃ ॥ ૧૦૨॥

ઉદ્દીપિતમણિઃ સ્ફૂર્જન્નૂપુરધ્વનિનાદિતઃ ।
ચલત્તોયપ્રવાહાઢ્યો નદીજલકણાકરઃ ॥ ૧૦૩॥

ભ્રમત્કુઞ્જરસઙ્ઘાતવન્દિતાઙ્ઘ્રિસરોરુહઃ ।
બ્રહ્માચ્યુતમહારુદ્રપુરસ્સરસુરાર્ચિતઃ ॥ ૧૦૪॥

અશેષશેષપ્રભૃતિવ્યાલજાલોપસેવિતઃ ।
ગર્જત્પઞ્ચાનનારાવવ્યાપ્તાકાશધરાતલઃ ॥ ૧૦૫॥

હાહાહૂહૂગતાત્યુગ્રસ્વરવિભ્રાન્તમાનસઃ ।
પઞ્ચાશદ્વર્ણબીજાખ્યમન્ત્રમન્ત્રિતવિગ્રહઃ ॥ ૧૦૬॥

વેદાન્તશાસ્ત્રપીયૂષધારાઽઽપ્લાવિતભૂતલઃ ।
શઙ્ખધ્વનિસમાક્રાન્તપાતાલાદિનભસ્તલઃ ॥ ૧૦૭॥

ચિન્તામણિર્મહામલ્લો બલ્લહસ્તો બલિઃ કવિઃ ।
કૃતત્રેતાયુગોલ્લાસભાસમાનજગત્ત્રયઃ ॥ ૧૦૮॥

દ્વાપરઃ પરલોકૈકઃ કર્મધ્વાન્તસુધાકરઃ ।
સુધાઽઽસિક્તવપુર્વ્યાસો બ્રહ્માણ્ડાદિકબાહુકઃ ॥ ૧૦૯॥

અકારાદિક્ષકારાન્તવર્ણપઙ્ક્તિસમુજ્જ્વલઃ ।
અકારાકારપ્રોદ્ગીતતાનનાદનિનાદિતઃ ॥ ૧૧૦॥

ઇકારેકારમત્રાઢ્યમાલાભ્રમણલાલસઃ ।
ઉકારોકારપ્રોદ્ગારિઘોરનાગોપવીતકઃ ॥ ૧૧૧॥

ઋવર્ણાઙ્કિતૠકારિપદ્મદ્વયસમુજ્જ્વલઃ ।
લૃકારયુતલૄકારશઙ્ખપૂર્ણદિગન્તરઃ ॥ ૧૧૨॥

એકારૈકારગિરિજાસ્તનપાનવિચક્ષણઃ ।
ઓકારૌકારવિશ્વાદિકૃતસૃષ્ટિક્રમાલસઃ ॥ ૧૧૩॥

અંઅઃવર્ણાવલીવ્યાપ્તપાદાદિશીર્ષમણ્ડલઃ ।
કર્ણતાલકૃતાત્યુચ્ચૈર્વાયુવીજિતનિર્ઝરઃ ॥ ૧૧૪॥

ખગેશધ્વજરત્નાઙ્કકિરીટારુણપાદકઃ ।
ગર્વિતાશેષગન્ધર્વગીતતત્પરશ્રોત્રકઃ ॥ ૧૧૫॥

ઘનવાહનવાગીશપુરસ્સરસુરાર્ચિતઃ ।
ઙવર્ણામૃતધારાઢ્યશોભમાનૈકદન્તકઃ ॥ ૧૧૬॥

ચન્દ્રકુઙ્કુમજમ્બાલલિપ્તસિન્દૂરવિગ્રહઃ ।
છત્રચામરરત્નાઢ્યભ્રુકુટાલઙ્કૃતાનનઃ ॥ ૧૧૭॥

જટાબદ્ધમહાનર્ઘમણિપઙ્ક્તિવિરાજિતઃ ।
ઝઙ્કારિમધુપવ્રાતગાનનાદવિનાદિતઃ ॥ ૧૧૮॥

ઞવર્ણકૃતસંહારદૈત્યાસૃક્પ્પર્ણમુદ્ગરઃ ।
ટકારાખ્યાફલાસ્વાદવેપિતાશેષમૂર્ધજઃ ॥ ૧૧૯॥

ઠકારાદ્યડકારાઙ્ઢકારાનન્દતોષિતઃ ।
ણવર્ણામૃતપીયૂષધારાધારસુધાકરઃ ॥ ૧૨૦॥

તામ્રસિન્દૂરપૂજાઢ્યલલાટફલકચ્છવિઃ ।
થકારઘનપઙ્ક્ત્યાતિસન્તોષિતાદ્વિજવ્રજઃ ॥ ૧૨૧॥

દયામૃતહૃદમ્ભોજધૃતત્રૈલોક્યમણ્ડલઃ ।
ધનદાદિમહાયક્ષસંસેવિતપદામ્બુજઃ ॥ ૧૨૨॥

નમિતાશેષદેવૌઘકિરીટમણિરઞ્જિતઃ ।
પરવર્ગાપવર્ગાદિભોગેચ્છેદનદક્ષકઃ ॥ ૧૨૩॥

ફણિચક્રસમાક્રાન્તગલમણ્ડલમણ્ડિતઃ ।
બદ્ધભ્રૂયુગભીમોગ્રસન્તર્જિતસુરસુરઃ ॥ ૧૨૪॥

ભવાનીહૃદયાનન્દવર્દ્ધનૈકનિશાકરઃ ।
મદિરાકલશસ્ફીતકરાલૈકકરામ્બુજઃ ॥ ૧૨૫॥

યજ્ઞાન્તરાયસઙ્ઘાતસજ્જીકૃતવરાયુધઃ ।
રત્નાકરસુતાકાન્તિક્રાન્તિકીર્તિવિવર્ધનઃ ॥ ૧૨૬॥

લમ્બોદરમહાભીમવપુર્દીપ્તકૃતાસુરઃ ।
વરુણાદિદિગીશાનસ્વર્ચિતાર્ચનચર્ચિતઃ ॥ ૧૨૭॥

શઙ્કરૈકપ્રિયપ્રેમનયનાન્દવર્દ્ધનઃ ।
ષોડશસ્વરિતાલાપગીતગાનવિચક્ષણઃ ॥ ૧૨૮॥

સમસ્તદુર્ગતિસરિન્નાથોત્તારણકોડુપઃ ।
હરાદિબ્રહ્મવૈકુણ્ઠબ્રહ્મગીતાદિપાઠકઃ ॥ ૧૨૯॥

ક્ષમાપૂરિતહૃત્પદ્મસંરક્ષિતચરાચરઃ ।
તારાઙ્કમન્ત્રવર્ણૈકાવિગ્રહોજ્જ્વલવિગ્રહઃ ॥ ૧૩૦॥

અકારાદિક્ષકારાન્તવિદ્યાભૂષિતવિગ્રહઃ ।

ॐ શ્રીવિનાયકો ॐ હ્રીં વિઘ્નાધ્યક્ષો ગણાધિપઃ ॥ ૧૩૧॥

હેરમ્બો મોદકાહારો વક્રતુણ્ડો વિધિઃ સ્મૃતઃ ।
વેદાન્તગીતો વિદ્યાર્થિસિદ્ધમન્ત્રઃ ષડક્ષરઃ ॥ ૧૩૨॥

ગણેશો વરદો દેવો દ્વાદશાક્ષરમન્ત્રિતઃ ।
સપ્તકોટિમહામન્ત્રમન્ત્રિતાશેષવિગ્રહઃ ॥ ૧૩૩॥

ગાઙ્ગેયો ગણસેવ્યશ્ચ ॐ શ્રીદ્વૈમાતુરઃ શિવઃ ।
ॐ હ્રીં શ્રીં ક્લીં ગ્લૌં ગઁ દેવો મહાગણપતિઃ પ્રભુઃ ॥ ૧૩૪॥

ઇદં નામસહસ્રં તુ મહાગણપતેઃ સ્મૃતમ્ ।
ગુહ્યં ગોપ્યતમં સિદ્ધં સર્વતન્ત્રેષુ ગોપિતમ્ ॥ ૧૩૫॥

સર્વમન્ત્રમયં દિવ્યં સર્વવિઘ્નવિનાશનમ્ ।
ગ્રહતારામયં રાશિવર્ણપઙ્ક્તિસમન્વિતમ્ ॥ ૧૩૬॥

સર્વાવિદ્યામયં બ્રહ્મસાધનં સાધકપ્રિયમ્ ।
ગણેશસ્ય ચ સર્વસ્વં રહસ્યં ત્રિદિવૌકસામ્ ॥ ૧૩૭॥

યથેષ્ટફલદં લોકે મનોરથપ્રપૂરણમ્ ।
અષ્ટસિદ્ધિમયં શ્રેષ્ઠં સાધકાનાં જયપ્રદમ્ ॥ ૧૩૮॥

વિનાર્ચનં વિના હોમં વિનાન્યાસં વિના જપમ્ ।
અણિમાદ્યષ્ટસિદ્ધીનાં સાધનં સ્મૃતિમાત્રતઃ ॥ ૧૩૯॥

ચતુર્થ્યામર્ધરાત્રે તુ પઠેન્મન્ત્રી ચતુષ્પથે ।
લિખેદ્ભૂર્જે મહાદેવિ ! પુણ્યં નામસહસ્રકમ્ ॥ ૧૪૦॥

ધારયેત્તં ચતુર્દશ્યાં મધ્યાહ્ને મૂર્ધ્નિ વા ભુજે ।
યોષિદ્વામકરે ચૈવ પુરુષો દક્ષિણે ભુજે ॥ ૧૪૧॥

સ્તમ્ભયેદપિ બ્રહ્માણં મોહયેદપિ શઙ્કરમ્ ।
વશયેદપિ ત્રૈલોક્યં મારયેદખિલાન્ રિપૂન્ ॥ ૧૪૨॥

ઉચ્ચાટયેચ્ચ ગીર્વાણં શમયેચ્ચ ધનઞ્જયમ્ ।
વન્ધ્યા પુત્રં લભેચ્છીઘ્રં નિર્ધનો ધનમાપ્નુયાત્ ॥ ૧૪૩॥

ત્રિવારં યઃ પઠેદ્રાત્રૌ ગણેશસ્ય પુરઃ શિવે ।
નગ્નઃ શક્તિયુતો દેવિ ભુક્ત્વા ભોગાન્યથેપ્સિતાન્ ॥ ૧૪૪॥

પ્રત્યક્ષવરદં પશ્યેદ્ગણેશં સાધકોત્તમઃ ।
ય ઇદં પઠતે નામ્નાં સહસ્રં ભક્તિપૂર્વકમ્ ॥ ૧૪૫ ॥

તસ્ય વિત્તાદિવિભવોદારાયુઃ સમ્પદઃ સદા ।
રણે રાજમયે દ્યૂતે પઠેન્નામસહસ્રકમ્ ॥ ૧૪૬ ॥

સર્વત્ર જયમાપ્નોતિ ગણેશસ્ય પ્રસાદતઃ ॥ ૧૪૭ ॥

ઇતીદં પુણ્યસર્વસ્વં મન્ત્રનામસહસ્રકમ્ ।
મહાગણપતેઃ પુણ્યં ગોપનીયં સ્વયોનિવત્ ॥ ૧૪૭ ॥

॥ ઇતિ શ્રીરુદ્રયામલતન્ત્રે
શ્રીમદુચ્છિષ્ટગણેશસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by DPD, PSA Easwaran

*Shri Uchchishtaganapati Sahasranama Stotram*
pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*